दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णाद्वितीया
फाल्गुण 21 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-133 | 1 | मार्च 05, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 राज्यसभा-निर्वाचनम्-: भाजपा-दलस्य नव-प्रत्याशिनां घोषणा

3 HP Panchayat Election- ३१ मार्च दिनाङ्के प्रसारिता भविष्यति अन्तिमा आरक्षणसूची, सज्जता आरब्धा

4 जम्मूकाश्मीरस्य डोडायां होलिका-महोत्सवोपलक्ष्ये हर्षोल्लासेन आयोजितः संस्कृत- कुटुम्बसम्मेलनम्

## फिनलैण्ड-देशस्य राष्ट्रपतिः अलेक्ज़ैण्डर स्टब इत्येषः भारतस्य राजकीययात्रायै नवदेहलीं समागतवान्



**हिमसंस्कृतवार्ताः** - फिनलेण्ड-देशस्य राष्ट्रपतिः अलेक्ज़ैण्डर स्टब इत्येषः भारतस्य राजकीययात्रायै नवदेहलीं समागतवान्। नवदेहलीम् आगत्य श्री. स्टब इत्यसौ सामाजिकान्तर्जालीय पटले अवोचत् यत् तस्य यात्रया व्यापार-क्षेत्रेण सह फिनलेण्ड-भारतयोः मध्ये सम्बन्धः इतोऽपि सुदृढो भविष्यति । फिनलेण्ड-देशस्य राष्ट्रपतेः स्वागतम् कुर्वन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् तस्य यात्रया भारत-फिनलेण्ड-देशयोः सम्बन्धः नूतनं-औन्नत्यं निष्प्रप्चं प्राप्स्यति ।

## क्षेत्रीय-मध्यसंघर्षे यू.के. फ्रान्स-देशौ च साईप्रस-क्षेत्रे युद्धपोतान् वायु-रक्षासामग्रीं च नियोजयतः



**हिमसंस्कृतवार्ताः** - पश्चिम-एशियायाः कतिपयक्षेत्रेषु कृताक्रमणानन्तरं ब्रिटेन-फ्रान्स-देशौ साईप्रस-क्षेत्रे युद्धपोतान् वायु-रक्षा-प्रणाल्यश्च नियोजयन्तौ स्तः इत्येषा सूचना सामाजिक-प्रसारमाध्यमे ब्रिटिश-प्रधानमन्त्री कीर स्टार्मर इत्यनेन दत्ता। सः अवदत् यत् ब्रिटेन-देशः स्वस्य रक्षात्मक-कार्याणि निरन्तरं कुर्वन् अस्ति। तेनोक्तं यत् यू के.देशः ड्रोन-प्रहारैः युक्तानि उदग्र-विमानानि प्रेषयति, सहैव हि एच्.एम्.एस्. ड्रैगन्-विमानान्यपि नियोजयति । फ्रांसदेशस्य राष्ट्रपतिः इम्मानुयेल म्याक्रोन् इत्येषः अपि विमानवाहकं चार्ल्स डी गौल् इत्यमुं भूमध्यसागरम् उद्दिश्य गन्तुं आदिष्टवान्। अस्मिन् विषये सः अवदत् यत् फ्रान्स्-देशः सुरक्षायै क्षेत्रीय-अखण्डतायै च अस्मिन् क्षेत्रे स्वसहयोगिभिः सह स्थितोऽस्ति।

## इजरायल-देशः इरान-देशस्य तेहरान-नगरस्य बसिज-नगरे, आन्तरिक-सुरक्षाधिकार-केन्द्रेषु च अनेकानि आक्रमणानि अकरोत्



**हिमसंस्कृतवार्ताः** - पश्चिम-एशियाक्षेत्रे द्वन्द्वः तीव्रः अभवत् यतः इजरायल-देशः इरान-देशस्य तेहरान-नगरस्य बसिज-नगरे, आन्तरिक-सुरक्षाधिकार-केन्द्रेषु च अनेकानि आक्रमणानि अकरोत्। इजरायल-रक्षाबलैः सामाजिक-माध्यमे उक्तं यत् लक्ष्यीकृत-आदेश केन्द्राणि इरानी-शासनेन सम्पूर्ण इरान-देशे नियन्त्रणं स्थापयितुं उपयुज्यन्ते । आई. डी. एफ्. इत्यनेन शासनस्य क्षिपणि-प्रक्षेपकानि अन्यानि च प्रणाल्यः अपि प्रयुक्तानि । इजरायल-वायुसेनापि उक्तं यत् वायुसेनायाः विमानानि विरुध्य वायु-रक्षा-प्रणाली प्रवर्तयन्तः इरानी सैनिकाः निष्प्रभाविताः अभवन् । अमेरिका-देशस्य मानवाधिकार-वार्तावाहिनी अवदत् यत् फरवरी-मासस्य अष्टाविंशतिः दिनाङ्कात् आरभ्य ईरान्-देशे एकादशशतप्रायः नागरिकाः मारिताः इति सूचितम् अस्ति। अमरीकादेशस्य केन्द्रीय रक्षाधिपतिः एडमिरल ब्राडकूपर् इत्ययम् अवदत् यत् अमेरिकादेशः न स्थगितो भविष्यति अथ च इरान-देशस्य प्रत्याक्रमण-क्षमता द्रुतगत्या न्यूनी भवति ।

## गल्फ्-प्रदेशात् विलम्बितान् यात्रिकान् आनेतुं इण्डियन्-एयरलाइंस संस्थाभिः अष्टपञ्चाशत् विमानयानानि प्रचाल्यन्ते




**हिमसंस्कृतवार्ताः** - इण्डियन-एयर्लायन्स इति संस्थया भारतस्य गल्फ-प्रदेशस्य च मध्ये अष्टपञ्चाशत् विमानयानानि सञ्चालयितुं निश्चितम् कृतमस्ति, येन वर्तमानिक संघर्षस्य कारणात् पश्चिम-एशियादेशे विलम्बितानामवरुद्धानां वा यात्रिकाणां सञ्चारः सुकरः भवेत् । नागरिक-विमानयान-मन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् भारतीय-विमान-संस्थाः अष्टपञ्चाशत् विमानयानानि सञ्चालयितुं योजनां कुर्वन्त्यः सन्ति, येषु इण्डिगो-संस्थायाः त्रिंशत्, एयर्-इण्डिया-संस्थायाः, एयर्-इण्डिया-एक्स्प्रेस्-संस्थायाः च त्रयोविंशतिः विमानयानानि सन्ति। मन्त्रालयः अवदत् यत् पश्चिम-एशियायाः केषुचित् भागेषु विकसितायाः वायुप्रदेशस्य स्थित्या सह अन्ताराष्ट्रियविमानप्रचालनेषु तस्य प्रभावस्य च निरन्तरं निरीक्षणं कुर्वन् अस्ति। मन्त्रालयः इत्यपि दृढीकृतवान् यत् सर्वकारः विमानसेवाभिः सह निरन्तरतया सम्पर्के अस्ति तथा च अस्मिन् काले यात्रापत्रेषु अनुचितमूल्यवृद्धिः न भवेदिति सुनिश्चितं कर्तुं विमानयान-शुल्कस्य निरीक्षणं निकटतया कुर्वन् अस्ति।

## भूटानदेशस्य विदेश-वैदेशिकव्यापारमन्त्री माल्टादेशस्य उपप्रधानमन्त्री च नवदेहलीं प्राप्तवन्तौ



भूटानदेशस्य विदेश-वैदेशिकव्यापारमन्त्री दीना नाथ धुंग्येल तथा माल्टादेशस्य उपप्रधानमन्त्री, विदेशमन्त्री, पर्यटनमन्त्री च इयान बोर्ग नवदेहलीं सम्प्राप्तवन्तौ। तौ एकादशमे 'रायसीना डायलॉग' (Raisina Dialogue) सम्मेलने भागं ग्रहीष्यतः।विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः सामाजिकमाध्यमेन (Social Media) न्यगादीत् यत् भारत-भूटानदेशयोः सहभागिता प्रगाढ-परस्परविश्वास-सद्भावयोः उपरि आधारिता अस्ति। सः अवदत् यत् श्रीदीनानाथस्य अनया यात्रया उभयोः देशयोः सम्बन्धाः अधिकाः सुदृढाः भविष्यन्ति। श्रीजायसवालः इदमपि अवदत् यत् भारत-माल्टादेशयोः मध्ये मैत्रीपूर्णाः सौहार्दपूर्णाः च सम्बन्धाः सन्ति, ये जनसामान्यानां परस्परं प्रगाढसम्बन्धेषु आधारिताः वर्तन्ते।

## सुभाषितम्

**पितृमातृसमं लोके,**
**नास्त्यन्यद्दैवतं परम्।**
**तस्मात् सर्व प्रयत्नेन,**
**पूजयेत् पितरौ सदा।।**


अर्थात्- इस संसार में माता पिता के समान श्रेष्ठ अन्य कोई देवता नहीं है अतः सदैव सम्यक् प्रकार से अपने माता पिता की पूजा करनी चाहिए।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## ऑक्सफोर्ड-विश्वविद्यालयस्य एशमोलियन-सङ्ग्रहालयेन षोडशशताब्द्याः 'सन्त-थिरुमङ्गाई-आल्वार' महोदयस्य कांस्यप्रतिमा भारताय प्रतिदत्ता



ऑक्सफोर्ड-विश्वविद्यालयस्य एशमोलियन-सङ्ग्रहालयेन सन्त-थिरुमङ्गाई-आल्वार महोदयस्य षोडशशताब्द्याः एका कांस्यप्रतिमा भारताय प्रतिदत्ता अस्ति। इयं प्रतिमा तमिलनाडुराज्यस्य 'थाडिकोम्बु' स्थितस्य श्रीसौन्दराज-पेरुमल-मन्दिरस्य कृते प्रतिस्थापयिष्यते। सङ्ग्रहालयेन इयं प्रतिमा १९६७ तमे वर्षे 'सोथबी' (Sotheby's) इति नीलामी-प्रक्रियायां प्राप्ता आसीत्। ह्यः सायङ्काले 'इण्डिया हाउस' मध्ये आयोजिते एकेन औपचारिक-हस्तान्तरण-समारोहेण सह इयं प्रक्रिया सम्पना अभवत्।

# राज्यसभा-निर्वाचनम्-: भाजपा-दलस्य नव-प्रत्याशिनां घोषणा

भारतीयजनतापक्षेण षट्सु राज्येषु आगामि-२०२६ (2026) वर्षस्य राज्यसभा-द्विवार्षिक-निर्वाचनाय नव-प्रत्याशिनां नामानि घोषितानि।

## राज्यवारं प्रत्याशिनां विवरणम्

राज्यम् रिक्तस्थानानि भाजपा-प्रत्याशिनः
बिहार ५ नितिन नबीन (दलाध्यक्षः), शिवेश कुमारः
असम ३ तेरश गोवाला (विधायकः), जोगेन मोहनः (मन्त्री)
ओडिशा ४ मनमोहन सामलः (दलाध्यक्षः), सुजीत कुमारः
छत्तीसगढ़ २ लक्ष्मी वर्मा
हरियाणा २ संजय भाटिया (पूर्व-सांसदः)
पश्चिम-बङ्गाल ५ राहुल सिन्हा (पूर्व-अध्यक्षः)

**मुख्यबिन्दवः-नामाङ्कनम्-:** १६ मार्च दिनाङ्के भवितव्यस्य निर्वाचनस्य कृते नामाङ्कन-पत्रं प्रपूरयितुं अन्तिम-तिथिः श्वः (श्वोभूते) अस्ति। **असम-विशेषः-:** मुख्यमन्त्री हिमन्त बिस्व सरमा अवदत् यत् तृतीये स्थाने भाजपा स्वप्रत्याशिनं न स्थापयिष्यति, यतः तत्र विजयस्य सम्भावना नास्ति। **छत्तीसगढ़-:** अत्र राज्य-महिला-आयोगस्य सदस्या लक्ष्मी वर्मा मनोनीता अस्ति।

# अखिल भारतीय बैडमिंटन प्रतियोगिता-: लक्ष्यसेनस्य महती विजयश्री



बर्मिंघमःइंग्लैंड-बैडमिंटन-प्रतियोगिता परह्यः बर्मिंघम-नगरे आरब्धा। पुरुष-एकल-वर्गस्य प्रथमचरणे भारतस्य लक्ष्यसेनेन विश्वस्य प्रथमक्रमाङ्कस्य वर्तमानविजेतुः च चीनदेशीयस्य शी युकी इत्यस्य पराजयः कृतः। लक्ष्यः तं 23-21, 19-21, 21-17 इति अङ्कैः पराजितवान्। अधुना लक्ष्यसेनः 'राउंड ऑफ 16' (अष्टम-अन्तिम-चरणम्) प्रविष्टवान्, यत्र तस्य स्पर्धा हांगकांग-चीनदेशस्य एनजी का लॉन्ग एंगस इत्यनेन सह भविष्यति।महिलावर्गे, वर्तमान-ओलम्पिक-विजेत्री दक्षिणकोरियादेशस्य आन सेयोंग तुर्कीदेशस्य नेस्लिहान एरिन इत्यस्याः पराजयं अकरोत्।मिश्रित-युगल-क्रीडायां भारतस्य शीर्षजोडी तनीशा क्रास्टो तथा ध्रुव कपिला अपि द्वितीयचरणं प्राप्तवन्तौ। तौ मलेसियादेशस्य हू पांग रॉन तथा चेंग सु यिन इत्यनयोः युग्मं पराजितवन्तौ।द्विवारं ओलम्पिक-पदकविजेत्री पी.वी. सिन्धु अस्मिन् प्रतियोगिते भागं न गृह्णाति। पश्चिम-एशिया-क्षेत्रे वर्तमान-भू-राजनैतिक-तनावकारणात् सा दुबई-विमानपत्तने स्थगिता आसीत्, अतः सा स्वगृहं प्रत्यागता अस्ति।

# राज्यपाल- मुख्यमन्त्रि- विपक्षनेतृभिः सोल्लासं मानितः वर्णोत्सवः, सम्पूर्णे प्रदेशे च हर्षोल्लासेन आचरितः



हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खु बुधवासरे स्वकीये सर्वकारीये निवासे 'ओक ओवर' इत्यत्र समाजस्य सर्वैः वर्गैः सह वर्णानां पर्व होलिकोत्सवं महता उत्साहेन हर्षोल्लासेन च पालितवान्। अस्मिन् अवसरे सम्पूर्णं वातावरणं भ्रातृत्वस्य उत्सवस्य च रङ्गे रञ्जितं दृश्यते स्म, यत्र मुख्यमन्त्री प्रदेशस्य प्रत्येकस्मात् कोणात् आगतानां नागरिकाणाम् आत्मीयतापूर्वकं स्वागतं कृतवान्।अस्य उत्सवस्य अवसरे मुख्यमन्त्री होल्याः महत्त्वं प्रतिपादयन् अवदत् यत् "एतत् पर्व जाति-पन्थयोः सर्वाः बाधाः विच्छिद्य परस्परं प्रेम, सद्भावं, भ्रातृत्वं च सुदृढं कर्तुम् एकं सशक्तं माध्यमं वर्तते।" प्रसारमाध्यमैः जनसामान्यैः च सह वार्तालापं कुर्वन् सः समस्त-प्रदेशवासिभ्यः होलिकोत्सवस्य हार्दिक्यः शुभाशयाः दत्तवान्। सः आशां प्रकटितवान् यत् वर्णानाम् एतत् पावनं पर्व प्रत्येकस्य नागरिकस्य जीवने शान्तिं, समृद्धिं, सुखं च आनेष्यति तथा च राज्यस्य सांस्कृतिकं धरोहरम् अधिकं समृद्धां करिष्यति।'ओक ओवर' मध्ये आयोजिते अस्मिन् कार्यक्रमे पारम्परिक- सङ्गीत-ध्वनिभिः सह जनाः परस्परं गुलाल-मर्दनं कृतवन्तः। मुख्यमन्त्री व्यक्तिगततया आगन्तुकैः सह मिलितवान्, तैः सह होली-पर्वणः सुखं च विभक्तवान्। अस्मिन् अन्तरे तत्र उपस्थितानां जनानां मध्ये महान् उत्साहः दृष्टः, मुख्यमन्त्री च सर्वेषाम् उज्ज्वल-भविष्याय मङ्गलकामनां कृतवान्।

## एकतायाः पर्व वर्तते होली - राज्यपालः

लोकभवने मुख्यमन्त्री सुखविन्दरसिंहसुक्खु तथा राज्यपालः शिवप्रतापशुक्लः परस्परं गुलाल-मर्दनं कृत्वा होल्याः शुभकामनाः दत्तवन्तः। राज्यपालः अवदत् यत् "होली वस्तुतः एकतायाः पर्व वर्तते, सर्वे जनाः भेदभावं विना एतं उत्सवं पालयन्ति। सर्वेभ्यः मम शुभाशयाः... एनम् उत्सवम् उत्साहेन शालीनतया च पालयन्तु।"

## नेता-प्रतिपक्षः जयरामठाकुरः अपि शासकीय- निवासे भाजपानेतृभिः सह होलीपर्व पालितवान्



शिमलानागरे विपक्षनेता जयरामठाकुरः अपि स्वकीये शासकीय-निवासे भाजपानेतृभिः सह होलिकोत्सवं सोल्लासं पालितवान्। अस्मिन् अवसरे जयरामठाकुरः अवदत् यत् "होली वस्तुतः एकतायाः पर्व वर्तते, सर्वे जनाः च भेदभावं विना एतं उत्सवं पालयन्ति। होलिकोत्सवस्य अवसरे सर्वेभ्यः मम शुभाशयाः... एनम् उत्सवम् उत्साहेन शालीनतया च पालयन्तु।"

## शिमलायाः सञ्जौलीक्षेत्रे रञ्जिता अभवत् वायुः; पर्यटकाः युनश्च सोल्लासं होलिकोत्सवं पालितवन्तः

शिमलानगरस्य सञ्जौलीनगरे पर्यटकाः स्थानीय-युनश्च वर्णानां पर्व होली-उत्सवं महता उत्साहेन पारम्परिक- सांस्कृतिक-भावनया च पालितवन्तः। अस्मिन् अन्तरे जनाः परस्परं गुलाल-मर्दनं कृतवन्तः, आपसी-सद्भावं च सुदृढं कृतवन्तः।
'एएनआई' (ANI) इति समाचार-संस्थया होलिकोत्सवस्य उत्साहे निमग्नानां यूनां एकः 'ड्रोन वीडियो' (Drone Video) प्रसारितः, यस्मिन् दृश्यते यत् आकाशे गुलाल-वर्णाः उड्डयन्ते, बहुसङ्ख्याकाः जनाश्च मार्गेषु एकत्र भूत्वा होली-उत्सवं पालयन्तः सन्ति।

# वर्णपर्व होली-उत्सवः सम्पूर्ण-देशे उत्साहेन आचरितः



**हिमसंस्कृतवार्ताः -** वर्णपर्व होलिकोत्सवः अशेषे देशे सोल्लासं समाचर्यते। एषः उत्सवः अशुभस्य उपरि शुभस्य विजयेन सह वसन्तकालस्य आरम्भमपि सूचयति। मध्यप्रदेशे पारम्परिक लोकगीतैः, साम्प्रदायिक-भोजैः, जीवन्त लोकगीतैश्च चिह्नितः होली उत्सवः अत्यन्तम् उत्साहेन आचर्यते। हिमाचलप्रदेशे जनाः प्रातःकालादेव अबीर् गुलाल् इत्येतयोः लेपनेन परस्परं अभिवादनपुरस्सरं उत्सवमिमं समाचरन्तः सन्ति। राष्ट्रपतिपदासीना द्रौपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी च अस्मिन् अवसरे जनान् प्रति शुभाशयान् प्रेषितवन्तः। सामाजिक-प्रसार माध्यमे राष्ट्रपतिः अवदत् यत् वर्णपर्व जनानां जीवने प्रेम आशां च आनयति, ऐक्यं भ्रातृत्वं च सुदृढं करोतीति। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अवदत् यत् अयम् उत्सवः देशस्य समृद्धपरम्परासु गभीरतया निहितः अस्ति, तथा च एतत् भ्रातृत्वं, परस्परम् आदरं, सहभागी-आनन्दं च प्रतिबिम्बयति, येन समाजस्य संरचनायाः सुदृढीकरणं भवति। प्रधानमन्त्री मोदी अवदत् यत् होली पर्व सम्पूर्ण वातावरणम् नूतनशक्त्या पूरयति । सः कामनाम् अकरोत् यत् वर्णपर्व प्रत्येकस्य जीवने सुखम्, समृद्धिं, साफल्यं च आनयत्।

# HP Panchayat Election- ३१ मार्च दिनाङ्के प्रसारिता भविष्यति अन्तिमा आरक्षणसूची, सज्जता आरब्धा




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे पञ्चायतीराज-संस्थानां निर्वाचनाय निर्वाचन- शङ्खनादः अचिरेणैव भविष्यति। सर्वोच्चन्यायालयद्वारा ३१ मई पर्यन्तं निर्वाचनप्रक्रियायाः समाप्तये समयसीमा निर्धारिता अस्ति, अतः प्रदेशसर्वकारेण 'युद्धस्तरे' सज्जता आरब्धा। राज्यसर्वकारेण सर्वेभ्यः उपायुक्तेभ्यः स्पष्टाः निर्देशाः कृताः यत् ३१ मार्च पर्यन्तं पञ्चायतानां 'आरक्षणसूची' अवश्यमेव अन्तिमरूपेण सज्जा करणीया।

## निर्वाचन-सूच्याः पूर्णा समयसारिणी

पञ्चायतीराज-विभागेन प्रसारितायाः समयसारण्याः अनुसारं रोस्टर-प्रक्रिया सोपानेषु पूर्णा भविष्यतिः
१. २० मार्चदिनांके सर्वेषु जनपदेषु आरक्षण-रोस्टर- निर्धारणस्य कार्यं प्रारप्स्यते।
२. ३० मार्चदिनांके प्रक्रियाम् अन्तिमरूपं प्रदाय प्रतिवेदनं (Report) सिद्धं करिष्यते।
३. ३१ मार्चदिनांके उपायुक्ताः आधिकारिकरूपेण स्व-स्व जनपदानाम् आरक्षणसूचीं सार्वजनिकां करिष्यन्ति।

**८४ नूतनपञ्चायतानां परिवर्तयिष्यति समीकरणम्**
प्रदेशे ८४ नूतनपञ्चायतानां निर्माणेन, बह्वीनां पञ्चायतानां सीमापरिवर्तनेन च (पुनर्सीमाङ्कनम्) अस्मिन् समये आरक्षणनिर्धारणे नूतनता भविष्यति। सर्वकारेण स्पष्टीकृतं यत् आरक्षण-निश्चयाय अनुसूचितजाति (SC), अनुसूचित-जनजाति (ST), महिलावर्गस्य जनसङ्ख्यायाः नूतनतमाः अङ्काः (Latest data) एव आधारभूताः भविष्यन्ति। यथा एव ३१ मार्च दिनाङ्के आरक्षणसूच्याः स्थितिः स्पष्टा भविष्यति, तथा एव राज्य-निर्वाचन-आयोगः निर्वाचन-तिथीनां घोषणां कर्तुं शक्नोति। राजनैतिक-क्षेत्रेषु चर्चा अस्ति यत् अप्रैल-मासस्य मध्यपर्यन्तं निर्वाचन-अधिसूचना निर्गन्तुं शक्नोति।
हिमाचलप्रदेशस्य पञ्चायतीराजमन्त्री अनिरुद्धसिंहः अवदत् यत् "वयं सर्वान् जनपदान् ३१ मार्च पर्यन्तं आरक्षणरोस्टरं सिद्धं कर्तुम् आदिष्टवन्तः। नूतन-पञ्चायतानां निर्माणानन्तरम् एषा प्रक्रिया अतीव महत्त्वपूर्णा वर्तते, सा च पूर्ण-पारदर्शितया समयसीमायां पूर्णा भविष्यति।"

### पर्वतीयराज्यानां कृते उच्चस्तरीयां समितिं रचयेत् केन्द्रम् - मुख्यमन्त्री सुक्खुः

# नूतनव्यवस्थायाः निर्माणपर्यन्तम् अस्मिन् वर्षे

## आयव्ययकायहिमाचलप्रदेशाय अप्रतिबद्ध- अनुदानम् मिलेत्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलसर्वकारेण राजस्वहानि- अनुदानस्य (RDG) समाप्त्याः, केन्द्रीय-आयव्ययकस्य च पारणात् पूर्वं केन्द्रसर्वकारं प्रति द्वौ आग्रहौ कृतौ। प्रथमः अनुरोधः अस्ति यत् केन्द्रसर्वकारः तत्कालं एकाम् उच्चस्तरीयां समितिं रचयित्वा पर्वतीयराज्यानाम् अर्थव्यवस्थायाः सम्यक् आकलनं कारयेत्, यत् १६-तमे वित्तायोगेन न कृतम्। अस्मिन् आकलने तेषां विशिष्ट-आवश्यकतानुसारं 'आरडीजी' (RDG) पुनः प्रवर्तयेत्। द्वितीयः आग्रहः अस्ति यत् यतोहि हिमाचलसर्वकारेण २०२६-२०२७ वर्षस्य राज्य-आयव्ययकं प्रस्तुतं करणीयम्, अतः अस्य वित्तवर्षस्य राजस्वहानि- अनुदानस्य पूर्तये केन्द्रसर्वकारः अविलम्बम् एकं वित्तीयसाहाय्यं ('पैकेज') राज्याय दद्यात्। एषा राशिः 'विशेष-केन्द्रीय- सहायता' शीर्षकात् अप्रतिबद्ध-अनुदानरूपेण (अनटाइड ग्राण्ट) विमुक्तं कर्तुं शक्यते। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुमहोदयः केन्द्रीयवित्तमन्त्रिणा निर्मलासीतारमण महोदयया सह सम्मेलने अपि एतं पक्षं स्थापितवान्। अस्य पृष्ठे राज्यसर्वकारेण तर्कः दत्तः यत् १६ तमे वित्तायोगेन एका आश्चर्यमयी पद्धतिः स्वीकृता अस्ति।
१५ तमे वित्तायोगेन राज्याणां राजस्वस्य व्ययस्य च आकलनं राज्यवारं कृतम् आसीत्। राज्याणां विशेषपरिस्थितिं ध्यात्वा 'आरडीजी' इत्यस्य संस्तुतिः कृता आसीत्। १६ तमे वित्तायोगस्य प्रतिवेदनस्य (Report) ९ तमम् अध्यायम् यदि पश्यामः, तर्हि अत्र सर्वाणि राज्याणि एकस्मिन्नेव स्तरे (Scale) स्थापयित्वा संस्तुतिः कृता अस्ति। एषः आकलनस्य स्वस्थः पारदर्शी च मार्गः नास्ति। संविधानस्य अनुच्छेद २७५(१), २८०(३) (बी) इत्यस्य अनुसारं वित्तायोगस्य एतत् दायित्वं वर्तते यत् सः राज्यानाम् आवश्यकतानां राज्यवारं स्पष्टम् आकलनं कुर्यात् तदनुसारं च संस्तुतिं दद्यात्। येभ्यः १७ राज्येभ्यः १५-तमे वित्तायोगेन 'आरडीजी' दत्ता आसीत्, तेषु सकल- वार्षिक-आयव्ययकस्य १० प्रतिशततः अधिकः भागः केवलं त्रिषु राज्येषु अस्ति। एतेषु हिमाचलप्रदेशस्य उपरि सर्वाधिकः प्रभावः भवति। हिमाचलप्रदेशस्य आयव्ययकस्य आकारः अपि लघुरस्ति, अतः अन्यैः सह हिमाचलस्य तुलना असङ्गता अस्ति। मुख्यमन्त्री अवदत् यत् 'आरडीजी' ईदृशं माध्यमम् आसीत् येन कर-वितरणानन्तरं (Post Devolution) वयं स्वकीयम् आयव्ययकं सन्तुलितं स्थापयितुं विकासात्मकानि कार्याणि च निरन्तरं कर्तुं समर्थाः स्मः, परन्तु 'आरडीजी' इत्यस्य सहसा समाप्तिं हिमाचलस्य अर्थव्यवस्था न सोढुं शक्ष्यति, राज्ये कस्यापि दलस्य सर्वकारः भवतु।

# सर्वासु 'रियल-एस्टेट्' परियोजनासु निर्मीयन्ते

## विद्युत्- वाहन- निवेशन- केन्द्राणि

### धर्माणी अवदत्- 'हरित-राज्यस्य' लक्ष्यं प्रति अग्रे सरति हिमाचलप्रदेशः





**हिमसंस्कृतवार्ताः - शिमला।** नगर एवं ग्राम-नियोजनमन्त्री राजेश धर्माणी मङ्गलवासरे अवदत् यत् हरित-ऊर्जा-राज्यस्य लक्ष्यं प्राप्तुं सर्वकारः प्रतिबद्धतया प्रभावीणि पदानि स्थापयति। अस्यां दिशि 'हिमाचलप्रदेश- नगर एवं ग्रामनियोजन (१७ तमं संशोधनं) नियमाः २०२६' इत्यनुसारं सर्वासु वाणिज्यिक- (Commercial), सार्वजनिक- (Public), अर्ध-सार्वजनिक- भवनेषु, 'रियल-एस्टेट' परियोजनासु विद्युत्-वाहन- निवेशन- केन्द्राणि (EV Charging Points) निर्मीयन्ते। अस्य अतिरिक्तं प्रदेशे 'हिमाचलप्रदेश- ऊर्जा-संरक्षण- भवनसंहिता (HPECBC) एवं नियमाः २०१८' अनिवार्याः कृताः। एतेषां नियमानां अन्तर्गतं ७५० वर्गमीटर-परिमितं वा ततः अधिकं क्षेत्रे निर्मितानाम् आतिथ्य-(Hospitality), स्वास्थ्य- सेवा- सभागार- व्यावसायिक-शैक्षणिक- 'शॉपिङ्ग-कॉम्प्लैक्स', मिश्रित- उपयोग- भवनानां च कृते, ये 'ईसीबीजी' (ECBC) प्रावधानानुरूपं सन्ति, तेषां कृते आधारभूत- एफ. ए. आर. (Base FAR) १.७५ इत्यस्य स्थाने अतिरिक्तं ०.२५ 'फ्लोर-एरिया-रेशो' (FAR) अनुमतिः प्रदास्यते। 'एचपीईसीबीसी' नियमानुगुणं भवन-निर्माण-प्रक्रियायै आवेदकस्य, स्वामिनः, 'डिवेलपर' इत्यस्य च कृते 'ब्यूरो ऑफ एनर्जी एफिशिएंसी' (BEE) द्वारा अधिकृतम् ऊर्जा- लेखापरीक्षकस्य ('एनर्जी-ऑडिटर') सम्मिलितं करणम् अनिवार्यं भविष्यति। आवेदकेन नामाङ्कित- ऊर्जा-लेखापरीक्षकाय परियोजनाप्रारूपं (Design) वा रेखाचित्रं (Drawing) दातव्यं भविष्यति। तदनन्तरं सः भवन-निर्माणस्य अनुमतये सक्षम-प्राधिकारिणं प्रति आवेदनं करिष्यति। नगर-नियोजनमन्त्रिणा उक्तं यत् 'हिमाचलप्रदेश-नगर एवं ग्राम-नियोजन (१८-तमं संशोधनं) नियमाः २०२६' इत्यनुसारं रियल- एस्टेट-परियोजनासु 'प्रीमियम-एफ. ए. आर.' इति शुल्कं निर्धारितम्।
**तत्र च ०.२५ पर्यन्तं प्रीमियम-एफ. ए. आर. कृते ३,००० प्रति-वर्गमीटर-निर्मित-क्षेत्रम् (Built Area)।**
**०.२५ तः ०.५० पर्यन्तं प्रीमियम- एफ. ए. आर. कृते: ५,००० प्रति-वर्गमीटर-निर्मित-क्षेत्रम्।**
**०.५० तः ०.७५ पर्यन्तं प्रीमियम एफ. ए. आर. कृते: ७,००० प्रति वर्गमीटर- निर्मितक्षेत्रम् निर्धारितमस्ति।**

# साधनायै नमः, प्रतिभायाः सम्मानम्,

## "योग एव जीवनम्, सार्थककण्डवालः तस्य सशक्तोदाहरणम्।"



**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला।** होलीकोत्सवस्य पूर्वं पावने अवसरे कण्वनगरीकोटद्वारे आयोजिते भव्ये सम्मान- समारोह- कार्यक्रमे "डू समथिंग सोसायटी" इत्यनेन च महर्षिकण्वविद्यानिकेतनद्वारा युवा- योग- प्रतिभायां सार्थककण्डवालः योगक्षेत्रे तस्य उल्लेखनीय- उपलब्धीनां कृते सम्मानितः।

आयोजन-समित्या उक्तं यत् एतत् सम्मानं केवलं पारितोषिकं नास्ति, अपि तु बहुवर्षीय- कठोर- साधनायाः, अनुशासनस्य, त्यागस्य तथा योगे समर्पित- जीवनस्य अभिनन्दनम् अस्ति। अल्पायसि एव सः राष्ट्रीय-मञ्चेषु योगासनस्य माध्यमेन उत्तराखण्ड-राज्यस्य नाम गौरवान्वितं कृतवान्, विविधासु प्रतियोगितासु अनेकानि स्वर्ण- रजत- कांस्य- पदकानि अर्जितवान्, तथा बाल- युवा- वर्गं योगाभ्यासाय प्रेरितवान् एतत् वास्तविकं प्रशंसनीयम्।समारोहस्थले उपस्थितैः गणमान्य-अतिथिभिः अपि उक्तं यत् सार्थककण्डवाल इव युवानः अद्यतन-समाजस्य प्रेरणास्त्रोतः भवन्ति। तस्य समर्पणं दर्शयति यत् निरन्तर-अभ्यासेन सकारात्मक- दृष्ट्या च कश्चन अपि लक्ष्यं साधयितुं शक्यते।

**विशेष-आयोजक-मण्डलेन स्व-वक्तव्ये उक्तम्-**

"अस्माकं ध्येयम् केवलं प्रतिभानां सम्माननं न, अपि तु समाजे योग-स्वास्थ्य-संस्कार-भावनायाः सुदृढीकरणम् अस्ति। सार्थककण्डवालस्य तपस्यायाः सम्माननम् अस्माकं गौरवस्य विषयः अस्ति।"

कार्यक्रमस्य समापनम् एतेन संकल्पेन अभवत् यत् योगस्य माध्यमेन स्वस्थ-युवा-समाजस्य, संस्कारित-समुदायस्य, सशक्तराष्ट्रस्य च निर्माणाय निरन्तर-प्रयत्नाः क्रियन्ताम्।युवा- योग- प्रतिभायाः सार्थककण्डवालस्य विशेष-उपलब्धयः उत्तराखण्डस्य वर्धितः मानः कण्वनगरी कोटद्वारनिवासी युवा-योग-साधकः सार्थक कण्डवालः अद्य योग-जगति प्रेरणास्रोतरूपेण उदितः अस्ति। सः स्व-कठोर- परिश्रमेण, अनुशासनेन, निरन्तर-अभ्यासेन च अनेकाः उल्लेखनीयाः उपलब्धयः अर्जितवान्, उत्तराखण्डस्य च नाम राष्ट्रीयस्तरे गौरवान्वितं कृतवान्।

**प्रमुखाः उपलब्धयः-**

🥇 विभिन्न-राष्ट्रीय-योगासन-प्रतियोगितासु उत्कृष्ट-प्रदर्शनं कृत्वा स्वर्ण- रजत- कांस्य- पदक-प्राप्तिः।

🧘 जटिल- सन्तुलनात्मक-योगासन- विधासु विशेषदक्षता, येन निर्णायकैः प्रशिक्षकैः च विशेष-प्रशंसा प्राप्ता।

IN राष्ट्रीयमञ्चेषु उत्तराखण्ड-राज्यस्य प्रतिनिधित्वं कृत्वा राज्यस्य सांस्कृतिक-योग-परम्परायाः नूतनपरिचयं प्रदत्तम्।

👦 बाल- युवा- वर्गस्य योगाभ्यासे प्रेरणार्थं नियमित- प्रशिक्षण- मार्गदर्शन-प्रदानम्।

💪 स्वस्थ- जीवनशैली संदेशस्य जन- जनप्रसारणे सक्रिय-भूमिका।

सार्थक कण्डवालस्य सफलता केवलं व्यक्तिगत- उपलब्धिः न, अपि तु एतत् सिद्ध्यति यत् यदि लक्ष्यं स्पष्टं भवति, साधना च निरन्तरा, तर्हि वयः कदापि बाधा न भवति। तस्य अनुशासनं, संयमः, सकारात्मक-दृष्टिकोणः च अन्येषां यूनां कृते प्रेरणास्रोतः अस्ति।

# जम्मूकाश्मीरस्य डोडायां होलिका- महोत्सवोपलक्ष्ये हर्षोल्लासेन आयोजितः संस्कृत- कुटुम्बसम्मेलनम्



**हिमसंस्कृतवार्ताः- डोडा (जम्मूकाश्मीरम्)** संस्कृतभारती जम्मूकाश्मीरप्रान्त-पक्षतः डोडायाम् अतीव उत्साहेन 'भव्य- संस्कृत- होली- कुटुम्ब- सम्मेलनम् एवं रङ्गोत्सवः' आयोजितः। अस्मिन् कार्यक्रमे सांस्कृतिक, कुटुम्बप्रबोधनं, पुष्परङ्गोत्सवादयः क्रार्यक्रमाः अभवन्। कार्यक्रमस्य उद्घाटनं दीपप्रज्वालनेन अभवत्। कार्यक्रमे अतिथिनां परिचयः डोडाजनपदस्य बालकेन्द्रप्रमुखः इन्द्रकुमारः कारितवान्। कार्यक्रमे मुख्यातिथिरूपेण जिलोपायुक्तः कृष्णलालवर्यः (DC), मुख्यवक्तारूपेण प्रतापसिंहवर्यः, विशिष्टातिथिरूपेण संस्कृतभारत्याः उत्तरक्षेत्र- संघटनमन्त्री नरेन्द्रकुमारः, कार्यक्रमाध्यक्षः प्रो. बाबूरामवर्यः सेवानिवृत्त- प्राचार्यः, इत्यादयः उपस्थिताः आसन्।

कृष्णलालवर्येण उक्तं यत् संस्कृतं विश्वस्य प्राचीना भाषा अस्ति या भारतस्य दार्शनिकं सांस्कृतिकं च उत्तराधिकारं रक्षति। संस्कृतभारत्याः उत्तरक्षेत्र- संघटनमन्त्री अवदत् यत् संस्कृतं न केवलं सम्भाषणस्य माध्यमः, अपि तु अस्माकं मूल्यानां जीवनपद्धतेः च आधारः अस्ति। कार्यक्रमस्यान्ते धन्यवादज्ञापनं जिलामन्त्री शेषकुमारः अकरोत्। कार्यक्रमे कार्यकर्तारः ध्येयमन्त्रः, संस्कृत- काव्याली, एकलगीतम्, दूरवाणीसंवादः, श्रीमद्भगवद्गीतायाः द्वादशोध्यायस्य पारायणं इत्यादिनां प्रस्तुतवन्तः। कार्यक्रमस्य मञ्चसञ्चालनं स्नेहा रजनी च अकुरुताम्। कार्यक्रमे संस्कृतभारत्याः पत्राचारप्रमुखः राजदेवः, अन्ये जिलायाः कोषप्रमुखः सञ्जयः, गीताशिक्षणकेन्द्रप्रमुखः दलीपः, कार्यक्रमस्य व्यवस्थाप्रमुखः जियालालः, जनकः, सुदर्शनः, सविता, अंग्रेजसिंहः एवञ्च द्विशताधिकाः (२०० अधिकाः) आबालवृद्धाः सामाजिकाः उपस्थिताः आसन्।

# वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। श्रूयताम् प्रथमा वार्ता। चीनदेशस्य एकेन युवकेन वसन्तोत्सवे मार्जारेभ्यः आहारप्रदानेन विंशतिलक्ष-मितं रूप्यकधनम् अर्जितम् अस्ति।

नन्दिनी- पश्यतु, मार्जारसेवया अपि महद् धनं प्राप्तम्! द्वितीया वार्ता अतीव विशिष्टा अस्ति। बिहारप्रदेशस्य नालन्दामण्डले पञ्चसु ग्रामेषु होलिकोत्सवः वर्णैः न क्रीडितः। जनैः तत्र उपवासः कृतः अखण्डकीर्तनं च पालितम्।

काव्या- सत्यम्, एषा सात्त्विकी रीतिः सर्वैः श्लाघिता अस्ति। तृतीया वार्ता अन्तर्जालजगत्तः आगता। एकेन पुरुषेण कृत्रिमप्रज्ञा-यन्त्रं प्रति "किं ट्रम्प-नेतन्याहु- खामेनी-महोदयाः ग्रहणकाले जाताः" इति पृष्टम्। यन्त्रेण अपि उत्तरं दत्तम्।

नन्दिनी- बुद्धियन्त्रस्य सामर्थ्यं सर्वैः ज्ञातम् अस्ति। चतुर्थ्या वार्तायाः विषयः जलशुद्धिकरणम् अस्ति। जोधपुरनगरस्य एकेन कृषकेन भूजलस्य क्षारत्वं दूरीकर्तुं नवीनं चुम्बकीययन्त्रम् आविष्कृतम् अस्ति।

काव्या- सः कृषकः निश्चयेन प्रशंसनीयं कार्यं कृतवान् अस्ति। अद्यतनी वार्तावली अत्रैव समाप्ता। नमो नमः।

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

# संस्कृतं मधुरं सदा- ०२

सत्यस्य महत्त्वविषये अत्र किञ्चित् चर्च्यते। विचारणीयं यत् परमात्मनः स्वरूपं सदैव सत्यं वर्तते इति। यत्र सत्यं तत्रैव निर्भयता अपि। सत्यं हि मानवजीवनस्य लक्ष्यम्, एवं सत्यं हि साधना। अतः सत्यस्य सेवनम् अवश्यं कार्यम्। विचारे सत्यं, व्यवहारे सत्यं, क्रियायां सत्यं, वाण्यां सत्यं, सर्वत्र च सत्यं हि सत्यं सेवनीयम्। एतन्न विचारणीयं यत् सत्यसेवनेन हानिर्जायते इति। सत्यस्य सेवनं न कदापि हानिकारकं भवति। असत्ये संलग्ना बुद्धिः सदैव आत्मानं हि वञ्चयति, एतादृशी बुद्धिः सत्येन हानिर्भवतीति विपरीतदिशि आत्मानम्, इतरान् च प्रेरयति। सदैव सत्याचरणं कर्तव्यम्, अनेन आचरणेन हि बुद्धिः शुद्धा भवति। तदेव सत्यं सुन्दरं, यच्च सर्वेषां कृते कल्याणकारकं स्यात्। वस्तुतः सत्यं कल्याणस्य न कदापि विरोधि वर्तते। यस्मिन् सत्ये अकल्याणं गूहितं स्यात्, तन्न सत्यं कथ्यते कदाचिदपि। यस्य मनसि सत्यं वर्तते, तस्य मनसि दैविकलक्षणं प्रत्यक्षं जागर्ति। यस्य वाण्यां सत्यं स्यात्, तस्य वाण्यां दैविकवाणीवत् सत्यता भवति। यस्य व्यवहारे सत्यं स्यात्, तस्य व्यवहारः सर्वान् सन्मुखान् कर्तुं प्रभवति। सत्यस्य ध्यानेन, सत्यस्य सङ्कल्पेन, सत्यस्य मननेन, सत्यस्य अन्वेषणेन, सत्यस्य प्रयोगेण, सत्यस्य कथनेन, सत्यमहत्त्वस्य असकृद् विचारेण च सत्यविषये श्रद्धा भवति, तथा यस्य पुरुषस्य सत्ये श्रद्धा भवति स हि पुरुषः सत्यस्य सेवनं कर्तुमर्हतीति, शुभम्।



असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## बैलेस्टिक-प्रक्षेपास्त्रम् (Ballistic Missile)

बैलेस्टिक-प्रक्षेपास्त्र तादृशं अस्त्र अस्ति, यत् प्रक्षेपणस्य अनन्तरं गुरुत्वाकर्षणस्य (Gravity) आधारेण स्वलक्ष्यं प्रति गच्छति। एतत् अर्धचन्द्राकार-पथेन (Parabolic Path) गमनं करोति।

### मुख्य-विशेषांशाः (मुख्य विशेषताएँ)

गतिः (Speed): अस्य प्रक्षेपास्त्रस्य गतिः अतीव तीव्रा भवति। एतत् ध्वनेः गत्या अपि बहुगुणितेन वेगेन गन्तुं शक्नोति।

प्रक्षेपण-पथः (Trajectory): एतत् वायुमण्डलात् बहिः गत्वा पुनः गुरुत्वाकर्षणेन पृथ्वीं प्रति आगच्छति।